# आदर्श प्रश्नपत्र/ Model Question Paper
## वेदभूषण द्वितीय-वर्ष / Vedabhushan Second Year
## वर्ष / Year 2022-23

## विषय - संस्कृत

**वस्तुनिष्ठप्रश्नाः -** $1 \times 10 = 10$

1. विश्वस्य उपलब्धासु भाषासु का भाषा प्राचीनतमा ?

   क) हिन्दीभाषा  ख) संस्कृतभाषा

   ग) आङ्ग्लभाषा  घ) पालिभाषा

2. कति उच्चारणस्थानानि सन्ति ?

   क) 6  ख) 7

   ग) 8  घ) 9

3. "45" इत्यस्य संस्कृतं किम् ?

   क) पञ्चचत्वारिंशिती  ख) पञ्चचत्वारिंशितीः

   ग) पञ्चचत्वारिंशत्  घ) पञ्चत्रिंशत्

4. "क्षियायुत्सकः" इत्यस्य सन्धिविच्छेदः भवति -

   क) क्षियै + उत्सुकः  ख) क्षिय + आयुत्सकः

   ग) क्षिया + युत्सकः  घ) क्षि + यायुत्सकः

5. "चक्षुषे" इति पदे का विभक्तिः ?

   क) प्रथमा  ख) तृतीया

   ग) सप्तमी  घ) चतुर्थी

6. इक् प्रत्याहारे अधोलिखितेषु के वर्णाः अन्तर्भवन्ति ?

   क) अ इ उ ऋ  ख) इ उ ऋ ऌ

   ग) अ इ उ ण्  घ) ऋ ऌ ए ओ

7. लघुसिद्धान्तकौमुद्याः रचयिता कोऽस्ति ?

   क) वरदराजः  ख) पाणिनिः

   ग) कात्यायनः  घ) पतञ्जलिः

8. अयादिसन्धौ आव् आदेशः कस्य स्थाने भवति ?

क) ए　　ख) ओ

ग) ऐ　　घ) औ

9. उपसर्गाः कति भवन्ति ?

क) 20　　ख) 21

ग) 22　　घ) 23

10. पृथिव्यां कति रत्नानि विद्यन्ते ?

क) त्रीणि　　ख) चत्वारि

ग) पञ्च　　घ) षट्

**रिक्तस्थानानां पूर्तिः करणीया -** $1 \times 10 = 10$

11. आहारे व्यवहारे च ........................।

12. प्लुतप्रगृह्या ........................।

13. प्रातिपदिकार्थ ........................।

14. यदा यदा हि धर्मस्य ........................।

15. जननी जन्मभूमिश्च ........................।

16. अभितः परितः........................ योगेऽपि।

17. अजरामरवत् प्राज्ञो ........................ साधयेत्।

18. कर्मणा ........................ सम्प्रदानम्।

19. यत्र नार्यस्तु पूज्यन्ते ........................।

20. उपसर्गाः........................।

**सत्यम्/असत्यम् इति चिनुत -** $2 \times 5 = 10$

21. अपादाने षष्ठीविभक्तिः भवति।

22. षट् कारकाणि भवन्ति।

23. "इत्यादि" इति पदं यण् सन्धेः उदाहरणमस्ति।

24. परितः योगे तृतीयाविभक्तिः वर्तते।

25. पूर्वपदार्थप्रधानः अव्ययीभावः।

**समुचितशब्दमेलनं कुरुत -** $2 \times 5 = 10$

| | | |
|---|---|---|
| 26. | यण्-सन्धिः | वेदेऽस्मिन् |
| 27. | अयादिसन्धिः | सदैव |
| 28. | गुणसन्धिः | इत्यादि |
| 29. | वृद्धिसन्धिः | उपेन्द्र |
| 30. | पूर्वरूपसन्धिः | हरये |

**अतिलघूत्तरीयाः सर्वे प्रश्नाः समाधेयाः -** $2 \times 10 = 20$

31. वेदाभ्यासः इत्यत्र कः सन्धिः ?

32. गुणसञ्ज्ञासूत्रं किम् ?

33. हरि-लताशब्दयोः षष्ठीविभक्तेः रूपाणि लिखत।

34. श्वेतकेतोः पितुः नाम किम् ?

35. भोजनान्ते वारि कथं भवति ?

36. निर्धनानां धनं किम् अस्ति ?

37. सहयुक्तेऽप्रधाने का विभक्तिः भवति ?

38. "साधकतमम्" इत्यत्र कः कारकः ?

39. अस् धातोः लट्लकारस्य उत्तमपुरुषरूपाणि लिखत।

40. विद्वस्-शब्दस्य षष्ठी-सप्तमीविभक्तेः रूपाणि लिखत।

**लघूत्तरीयाः प्रश्नाः -** $3 \times 5 = 15$

41. भगवताम्, उपनिषदि, हविषा-एतेषां शब्दानां लिङ्ग-विभक्ति-वचनानि लिखत।

42. द्रक्ष्यसि, दास्यन्ति, वदतु-एतेषां क्रियापदानां लकार-पुरुष-वचनानि लिखत।

43. यण् - अयादि - दीर्घसन्धीनां त्रीणि-त्रीणि उदाहरणानि लिखत।

44. भावकः, विष्णोऽव, प्रेजते एतेषां पदानां सन्धिविच्छेदपूर्वकं सन्धिनाम लिखत।

45. कर्म-करण-सम्प्रदानसञ्ज्ञासूत्राणि लिखत।

**दीर्घोत्तरीयाः प्रश्नाः -** $5 \times 5 = 25$

46. स्वरसन्धेः प्रमुखाः भेदाः के ? ससूत्रं नामानि लिखत ?

47. "जिजये" धातोः परस्मैपदी लट्-लोट्-लङ्-लृट्-विधिलिङ्लकाराणां रूपाणि लिखत।

48. चकारान्तस्त्रीलिङ्ग-ऋच्-शब्दस्य रूपाणि सप्तसु विभक्तिषु लिखत।

49. तत्पुरुषसमासः कतिधा ? तेषां नामानि उदाहरणपुरस्सरं लिखत।

50. कति उपसर्गाः भवन्ति ? तेषां नामानि लिखत।